प्रवेश सं०

विषय: धर्मशास्त्रम्

क्रम सं०

नाम त्रिंशच्छ्लोकी विवृत्ति:

ग्रन्थकार रघुनाथ:

पत्र सं० ~~१-१५, २१-७६~~ 13891

श्लोक सं० १-१३, १५-७६ अक्षर सं० (पक्तौ) ४० पंक्ति सं० (पृष्ठे) १२

आकार: ११.८ × ४.५

लिपि: दे.ना.

आधार: का.

वि० विवरणम् ~~[illegible]~~ प्र.

आ. ८१६२

पी० एस० यू० पी०--७७ एस० सी० ई०--१९५१--५०,०००

Indira Gandhi National Centre for the Arts

त्रिंशश्लोकीटी
काप्रारंभः॥ श्री

Indira Gandhi National
Centre for the Arts

त्रि. टी. ॥१॥

॥ ॥श्रीगणेशाय नमः॥ ॥प्रणम्य शंभुं हेरंबं पितरौ पितरौ तथा। रघुनाथः प्रकुरुते त्रिंशच्छ्लोकीविवेचनं॥ ॥ निमित्तसंदर्भभिन्नाशौचप्रतिपादने कृते विविच्य क्रमेण वक्ष्यं कर्तव्यमस्मिन्निष्टरूप तदभावादस्तक्रममनुसरन् सगर्भपाताशौचं तावदाह॥ षण्मासाभ्यंतरे तु स्वपुरुषनिर्गते गर्भमात्रे विनष्टे माता तन्माससंख्यासमदिनमशुचिः॥ गर्भग्रहणादारभ्य षष्ठमाससमाप्तिं यावत् स्त्रिया उत्पन्ने अचेतने गर्भे पतिते माता तु गर्भया तन्माससमसंख्याहोरात्राण्यशुचिः स्यात्॥ चतुर्थे चत्वारि पंचमे पंच षष्ठे षडित्यर्थः॥ आद्यमासत्रये तु नेदं॥ किंतु त्रिरात्रमविशेषेण॥ गर्भस्रावे यथामासमचिरे तूत्तमे त्र्यह इति मरीचिस्मरणात्॥ अचिर आद्यमासत्रये पक्षे तेन ब्राह्मणे॥ नन्वचिरपदस्याद्यमासत्रयपरत्वे किं बीजमिति चेच्छृणु॥ षण्मासाभ्यंतरे यावद्गर्भस्रावो भवेद्यदा॥ तदा माससमैस्तासां दिवसैः शुद्धिरिष्यते इत्यत्र ह्युक्तविहितस्य षष्ठमासं यावन्माससमदिवसाशौचस्य तदंतःपातित्वाविशेषपात्रिरव काशत्वेन स्रावे मातुः त्रिरात्रं स्यादिति तु ह्युक्तविहितेन त्रिरात्राशौचेन बाधः स्यात् विषयत्वेन व्यवस्थापित्वेनापि तथापि दिवसैरिति बहुवचनानुरोधात्त्रिरात्राशौचस्याद्यमासत्रयविषयत्वं युक्तं॥ ननु प्रथममासमात्रे द्वितीयमात्रे तदुभयमेवं तास्य विषयो युक्तः॥ प्रथमत्रिरात्रं द्वितीये द्विरात्रमिति न्यायसिद्धेरिति चेत्॥ प्रथमपक्षासंभवात्॥ अचिरशब्दानुरोधात्त्रिलिंगसमवायगौणत्वाच्छब्दानुरोधात्प्रथममविषयता वरं यथा द्वि

स. हेरंब ॥१॥

तीयानुपपत्तेः॥ तृतीयविषयत्वविरोधाभावेन तत्परिहारकारणाभावात् तृतीयानुपपत्तेः॥ गर्भमाससमा रात्रीः संस्रवे गर्भस्य त्र्यहं वेति गौतमोक्तपक्षद्वयस्य बहुवचनानुरोधात् षण्मासमध्यविषयस्य व्यवस्थासंभवेऽव्यवस्थायोगात् व्यवस्थापक्षायामचिरशब्दोचितत्वाद्यनुगृहीतेन समं स्यादश्रुतत्वादिति न्यायेनाद्यमासत्रयविषयत्वेन व्यवस्थाया युक्तत्वाच्च॥ स्वपुरुषनिर्गतग्रहणमुत्तरार्थव्यभिचारेण गर्भस्य पूर्णप्रसवे पितुः संनिध्यसंनिधिव्यवस्थितत्रिरात्रैकरात्रसत्त्वेन सपिंडानां च तथैवैकाहस्याभ्यासत्वेन तदपूर्णोपगमे तेषामवाशौचाभावस्योचितत्वापातत्वात्॥ मातुस्तु तत्रापीदमेव विशेषानुक्तेः॥ गर्भमात्रस्यानुवादः॥ तदा तदवस्थायां नित्यप्राप्तत्वात्॥ स्नानशुद्धाः सपिंडाः॥ सपिंडाः पित्राद्याः स्नानशुद्धास्तत्कालावच्छिन्नाशौचिनः पूर्वोक्तविषये पंचमषष्ठवर्जं पित्राः॥ तथा च स्मरणं॥ सद्यःशौचं सपिंडानां गर्भस्य पतने सतीति॥ अशुचित्वाभावेनाशौचविधानानुपपत्तिर्निःकारणशौचासंभवाच्च सद्यःशौचं स्नानमात्राच्छुद्धिरित्यर्थः॥ यत्तु मरीचिवचनं स्रावे मातुस्त्रिरात्रं स्यात्सपिंडाशौचवर्जनमिति तत्सपिंडानां प्रकृतत्रिरात्राशौचाभावानुवादकं न तु सर्वथाशौचनिषेधकं॥ यदपि गर्भस्रावे मासतुल्या रात्रयः स्त्रीणां स्नानमात्रमेव पुरुषस्य पतितदपि मात्राशौचविधायकं सत्त्वं वाक्यशापमेव पितुः स्नानमनुवदति न लिखितरेखास्नानं निवर्तयतीति वाक्यभेदप्रसंगात्॥ यद्यप्येतद्वाक्यपर्यालोचनया स्नानमात्रसमाचोचयोरेकविषयत्वेऽप्रतीयते तथापि वाक्यांतरबलाद्भिन्नविषयत्वे लभ्यमाने

न्दोषमाव हति॥ अंत्यमासद्वये तु त्रिदिनमशुचयः॥ षट्सु मासेष्वंत्यं पंचमषष्ठाख्यमासद्वये गर्भपाते सपिंडास्त्रि
दिनमाशौचिनः स्युः॥ तथा च मरीचिः॥ पाते मातुर्यथामासं सपिंडानां दिनत्रयमिति॥ पातः पंचमषष्ठयोरिति च॥
अतः परं सूतिवत्स्यात्॥ अतः अंत्यमासद्वयादूर्ध्वं सप्तममासप्रभृति गर्भनिर्गमे सूतौ प्रसवनिमित्तं दशाहा
दि वर्णभेदेन स्यादिति वक्ष्यमाणमेव नैराकांक्ष्यार्थमुक्तं॥ अरिवृतिः॥ तथा च षण्मासाभ्यंतरं स्रवे तदनंत
रमतदूर्ध्वं स्वजात्युक्तं तासामाशौचं भविष्यतीति स्मरणं॥ अत्र तासां ग्रहणमुपलक्षणं॥ अतदूर्ध्वं प्रसूतिः
स्यादिति वाक्यात्सप्तमप्रभृति चाविकलांगस्य जीवतो निर्गमदर्शनात् तत्र च लोके प्रसवव्यवहारात्सप्तमप्रभृ म
तिगर्भनिर्गमस्य प्रसवशब्दवाच्यत्वात्प्रसवे च सर्वेषां दशाहाद्याशौचस्य यथेदं शावमाशौचं सपिंडेषु
विधीयते जननेप्येवमेव स्यान्निपुणां शुद्धिमिच्छतामिति स्मृत्युक्तत्वात्॥ चातुर्वर्ण्ये स्यात्तुल्यं भवति वय
सि पक्षोच्यते शौचमात्रं॥ गर्भस्य ग्रहणात्सप्तसप्तमे वयो न जन्मादि गर्भोपि प्रमादिवत्॥ तथा च गर्भग्रहणा
मासादारभ्य प्रसवपर्यंतं प्रसवे मारणेऽप्यापनयनेपर्यंतं चात्र स्त्रीविशेषपुरस्कारेण यदाशौचमभिहितं
वक्ष्यमाणं च तच्चातुर्वर्णानां तुल्यं भवति नोपनीतसपिंडमरणप्रसवाशौचवद्वर्णभेदाद्भिन्नमित्य
र्थः॥ तद्विधायकवचनेषु वर्णविशेषानुपादानात् तुल्यतामहाचार्यो याज्ञोचेवत॥ तुल्यं वयसि सर्वेषामति
क्रांते तथैव चेति व्याघ्रपादवचनाच्च॥ अत्रापि पूर्ववत्समन्वयः॥ यद्वा न्यायप्राप्तानुवादकेन वयोतिक्रां



तग्रहणस्यानुपात्तवर्णविशेषसर्वाशौचोपलक्षणत्वादुक्ताशौचस्य साधारण्यलाभः॥ आचार्याशौचस्य साधारण्यसिद्ध्यर्थं
तस्यावश्यकत्वात्॥ फले तु तदेव वयः॥ एवमाशौचस्य साधारण्ये संभवे विभज्य व्याख्याने मनुष्यगात्याहारापेक्षत्वादप
व्याख्याने॥ जन्माशौचांतराले यदि शिशुर्नालच्छेदकालेभिः प्राणैः पतेत्तदा जनननिमित्तमाशौचमस्य
वक्तव्यं॥ जन्माशौचांतराले जननाभिमाशौचपरिच्छेदकोहोरात्रम आनीलच्छेदकाले नालच्छेदानंतरं यदि
जीवत उत्पन्नस्य शिशोर्मरणमुपरमः निःप्राणत्वं एवं बालेः यत्तु सद्य इति तत्र हस्तिवेधदर्शपि मातुः पित्रादीनां च ज
ननजनितं जन्मनिमित्ते आशौचं कृत्स्नं दशाहाद्येवास्ति न तु वक्ष्यमाणेन रात्राद्याशौचेन निवर्तत इत्यर्थः॥ तथा च हारी
तः॥ जातमृते मृतजाते वा सपिंडानां दशाहमिति॥ जातमृत इति नालच्छेदात्पूर्वं॥ यावन्न छिद्यते नालं तावन्नाप्नोति
सूतकं॥ छिन्ने नाले ततः पश्चात्सूतकं तु विधीयत इति जैमिनिवचनात्॥ अस्य वचनस्य तत्प्रकरणपाठान्मृतपूर्ण
शब्दार्थव्याहृतस्य योजना॥ प्राक् नाभिच्छेदनाच्चेन्निधनमुपगतस्तत्तदहेनैव शुद्धिः सर्वेषां सूतिकायास्त्विह भवति सक
लकं॥ जीवन्तु सन्नाभिच्छेदनान्नालच्छेदात्प्राक् चेन्निधनमुपगतस्तत्तदहे सर्वेषामपि पित्रादीनां त्र्यहेण वै शुद्धिर्जी
ननाशौचस्य स्मृतिकायां मातुस्तु रहः अनंतरोक्तं पिता सपिंडानां दशाहमेवं जननाशौचं॥ पूर्वविषये पल्लस्वे
सर्थः॥ तथा च बृहन्मनुः॥ जीवजातो यदि ततो मृतः सूतक एव तु॥ सूतकं सकलं मातुः पित्रादीनां त्रिरात्रकमिति॥
ततो जननानंतरमेव नालच्छेदाद्वाग्भिः सर्थः॥ प्रेतशुद्धिरुक्तः सपः॥१॥ ॥छ॥ प्रेतशौचनंतर निमित्तमाशौचं

Indira Gandhi National
Centre for the Arts

त्रिं०श्लो० ॥३॥

लक्ष्यते॥ तस्य शुद्धिर्निवृत्तिः सद्यः स्नानमात्रेणैव त्रिष्वपि विषयेष्विव सर्पिः॥ तथा च शंखः॥ प्राङ्नामकरणात्सद्यः शौचमिति॥ सद्यस्त्वं च स्नानकालावच्छिन्नत्वमेव पूर्वोक्तयुक्तेर्विज्ञानेश्वरेण तथाव्याख्यानाच्च॥ यत्तु दशाहाभ्यंतरे बालप्रमीते तस्य शौचे वैः॥ शावाशौचं न कर्तव्यं सूतिशौचं विधीयत इति ब्रह्माण्डवचनं तत्सपिंडाशौचनिषेधकं॥ प्राङ्नामकरणादिति चेज्जन्माशौचकालोपलक्षणं आशौचांते नामकरणविधानात्॥ अतएव विष्णुवचनं॥ अनिर्दशे दशाहे तु पंचत्वं यदि गच्छति॥ सद्य एव विशुद्धिः स्यान्न प्रेतं नोदकक्रियेति॥ एतच्चानंतरं वक्ष्यमाणमपि जनने जनिते तदविशेषणाद्यावत्सप्रदर्शनार्थमुक्तं॥२॥ ॥ स्नाने प्राङ्मतेः॥ परे ते इति सर्वत्र संबध्यते॥ गतार्थं॥ अर्वाग्दशाहजननताहः परे तेऽग्निदग्धस्य तत्रापि सद्यः॥ नात्रिवर्षस्य कर्तव्या बांधवैरुदकक्रिया॥ जातदंतस्य वा कुर्यान्नाम्नि वापि कृते सतीति मनुवचने साहचर्यादुदकक्रियोपलक्षितस्य दाहस्यापि नामकरणोत्तरकालं विकल्पितत्वान्नामकरणादूर्ध्वं दंतोत्पत्तेस्तत्कालाकालादंतजन्म सप्तममासोपनिषद्दर्शनात्सप्तममासलक्षणादर्वाक् च इते मृते अग्निदग्धस्य सद्यः अहोरात्रमाशौचं॥ अदंतस्य तु न केवलं पूर्वोक्तविषय एव अत्रापि विषये सद्यः स्नानमात्रं भवति॥ तथा यमः॥ अदंतजाततनये शिशौ गर्भच्युते तथा॥ सपिंडानां तु सर्वेषामहोरात्रमशौचकमिति॥ पाज्ञे वपनक्रियापि॥ आदंतजन्मनः सद्य इति॥ अनेनाश्रुकेपातव्यवस्थापकत्वात् अदंतजाते बाले मृते सद्य एव नास्याग्निसंस्कारो नोदकक्रियेति विष्णुवचनेऽग्निसंस्कारनिषेधसाहचर्यात्सद्यःशौचस्यादाहविषयत्वं दहनस्य दा

हेरंब ३

हविषयत्वं परिशेषादवगम्यते॥ तदुपरि दिनमात्रमूर्ध्वं तच्चोलकर्मणो दंतजन्मोपरि आचूडतः त्रिवर्षो यावज्ज्ञापयेतानी वत्सर्पितं तृतीयवर्षसमाप्तिं यावदिति सर्पिः॥ अत्रिविधेयो वा आहुः तृतीयवर्षमप्राप्ते सर्पिः॥ चोलकर्मणः परतो दग्धस्य दग्धे चाह्निमहोरात्रमाशौचं॥ तथा च विष्णुः॥ दंतजातेऽकृतचूडे अहोरात्रेण शुद्धिरिति॥ इदं च दंतजननोर्ध्वं दाहे त्वहोरात्राशौचाभिधानं मिताक्षरानुसारेण॥ मम तु प्रतिभाति॥ कुतो हि वर्षत्रितगर्भपतने वा सपिंडानां त्रिरात्रमिति वसिष्ठोक्तत्रिरात्रस्य विषयो नक्तरात्रस्य व्यवस्थापकत्वात्॥ यद्यप्यकृतचूडो वै जातदंतस्तु संस्थितः॥ दाहयित्वा तथाप्येनमाशौचं त्र्यहमाचरेदित्यंगिरोवचनाद्दाहे त्र्यहः अदाहे त्वहरिति॥ यत्तु वर्षत्रयादूर्ध्वं कुलधर्मापेक्षयाऽकृतचूडस्य तद्विषयत्वमंगिरोवचनस्य विज्ञानयोगिनोक्तं तदयुक्तं॥ जातदंतपदवैयर्थ्यापत्तेः॥ नहि पूर्णत्रिवर्षोऽप्यजातदंतः संभाव्यते॥ इदमवाच्छिन्नसाशौचवद्दशाकादाविदमेवोक्तं॥ यत्तु आर्द्रे अंगिरोक्तौ स्मृतेः सौदौ चूडाग्रहणस्य कालोपलक्षणत्वात्तृतीयवर्षस्य च तत्कालादंतजननकालात्सप्तममासादूर्ध्वं वर्षद्वयाभ्यंतरे एकाह इति प्राप्येरुक्तं॥ तदयुक्तं॥ कालोपलक्षणत्वासंभवस्य वक्ष्यमाणत्वात्॥ न त्वत्तेऽपि यद्यपि दंतजन्मान्यायात्तृतीयवर्षे मतेः शुद्धिस्त्वनैशिकी अंगिरोवचनबलात्तदंतस्य धापक्रमस्य वावच्छिन्नं प्राप्नोति तथापि विशेषस्मृतेस्त्रिभिर्वर्षैर्मृतेः शुद्धिस्त्वनैशिकी अंगिरोवचनबलात्तदंतस्य वावच्छिन्नं युक्तं॥ यत्तु वसिष्ठवाक्ये तु नहि वर्षग्रहणं तत्तस्य निरवकाशत्वप्रसंगमुख्यत्वाद्दाहाभावेन त्रिरात्रप्राप्तो नहि द्विवर्षातस्यापि पाक्षिकदाहविधिद्योतनार्थं॥ अन्यथा तत्स्मृतेरानर्थक्यात्॥ सदध्र नहि वार्षि

दंत ५

सं.दी.
॥४॥

केवाले प्रेतत्वमनुगच्छतीत्यादि प्रमवचनेन एकाहविधौ तद्ग्रहणं तदपि तस्य निरवननुमुख्यत्वघातनार्थं तद्विवरस्य चूडाकरमु
ख्यत्वघातनार्थमिति दिक्॥ सचौले तु त्रिरात्रं॥ चूडाकर्मादि जातीनां सर्वेषामेव प्रमतः॥ प्रथमेब्दे तृतीये वा कर्तव्यं श्रु
तिचोदनादित्युक्तत्वात् संवत्सरः प्र र्न चूडाकर्म विधीयते॥ द्वितीये वा तृतीये वा कर्तव्यं स्मृतिदर्शनादिति च मनु
यमवचनात् प्रथमाब्दादावपि चूडाकरणस्यानुकल्पत्वाज्जननादूर्ध्वं सचौले कृतचौले परे तु वर्षत्रयमध्येऽपि त्रि
रात्रं॥ तथा च मनुः॥ नृणामकृतचूडानां शुद्धिर्नैशिकी स्मृता॥ निर्वृत्तचूडकानां तु त्रिरात्राच्छुद्धिरिष्यते इति॥
चूडाकरणं तु नामकर्मादेतज्जननवन्नेकालोपलक्षणं॥ तस्यानियतकालत्वेन कालविशेषस्योपलक्षणस्याप्युपमशक्य
त्वात्॥ न च नामधेयं दशम्यां तु द्वादश्यां वापि कारयेत्॥ पुण्ये तिथौ मुहूर्ते वा नक्षत्रे वा गुणान्वित इति मनुवचना
न्नामकरणमप्यनियतकालमिति वाच्यं॥ तस्याशौचान्तरपरत्वात्॥ तथा हि॥ दशम्यां रात्रावतीतायां ब्राह्मणः
द्वादश्यामतीतायां क्षत्रियो नामधेयं कुर्वीत॥ इदं चोपलक्षणं॥ वैश्यशूद्रौ षोडशे एकत्रिंशे च॥ एवं समने
नप्रकारेणास्याशौचान्ते नामकुर्यादित्यर्थो भवति॥ पुण्य इत्यादिस्तु केवलमिति तस्यार्थः॥ यद्वा ब्राह्मणं
प्रसवे एकादशाहे व्यतीपातादिमहादोषसंभवे द्वादशामनुकल्पेन विधीयते॥ महादोषसत्त्वे मुख्यकाले
पि शुभकर्मानुष्ठानमुक्तं गर्गेण॥ व्यतीपाते च संक्रान्तौ ग्रहणे वैधृतावपि॥ श्राद्धं कुर्यात् शुभं नैव प्राप्त
कालेऽपि मानव इति॥ अन्यत्रापि॥ अमासंक्रान्तिविष्ट्यादौ प्राप्तकालेऽपि नाचरेदिति॥ पुण्ये तिथिपरत्वेन स

वृद्धेनास्य व्याख्यानं कृतं तत्सकलग्रन्थस्मृतिविरोधादसद्व्याख्यानमेव॥ यदपि मेधातिथिना रात्रिविशेषणत्वात् स्त्रीलिं
गो दशमी द्वादशीशब्दो वहोरात्रपरो कृत्वा वचनबलाद्दशाशौचमध्येऽपि जातकर्मवन्नामकर्माप्यापस्त्वं व्याख्या
तो दशमी द्वादशीशब्दा वहोरात्रपरो अशौचमध्यगमे नामधेयमाशौचव्य
हारोपलक्षणत्वेपि ग्रमाणाभावाद् स्कं तदप्युक्तं॥ प्रमाणाभावादसिद्धः॥ आशौचव्यपगमे नामधेयमाशौचव्य
वहारोपलक्षणत्वेपि प्रमाणाभावादसिद्धस्कं तदप्युक्तं॥ दशम्यां तु व्यापितानाम कुर्यादित्यादि स्मृति
व्यतिक्रान्ते नामकर्म विधीयत इत्यादि विष्णुधर्मादि वचनसद्भावात्॥ दशम्यां तु व्यापितानाम कुर्यादित्यादिस्वा
पुवसति कोपानानेतरकालविधानात्॥ यस्तु रुद्रधरेण सत्यपि चूडाकरणस्य प्रथमवर्षादिकालत्वे विप्रेन्यून
त्रिवर्षे मृते शुद्धिरुक्ता नैशिकीत्यादि वाक्यस्य तीयवर्षात्पूर्वमहोरात्रशौचविधानात्तेदकवा स्वतपातृतीयवर्ष
मेवा चूडान्तेनैशिकीस्मृतेत्यादिवचनं व्यापिनस्तरस्कृतं तदपूर्ने द्विवर्षइत्यादिवसिष्ठादिवाक्ये स्वत्रैव त्रिरात्र
स्यापि विधानादयुक्तं॥ तृतीयाब्दउत्सर्गतश्चौलकालः प्रथमाब्दादिस्तु कुलधर्मापेक्षया यदा इति हारलता
दि वचने तु चूडाकर्मादि जातीनामित्यत्र प्रथमतृतीययोस्तुल्यवन्निर्देशाच्चूडाकार्या यथाकुलमित्यादिश्रुत
कुलधर्मप्राप्तत्वेन वसर्वेषां निर्देशात् घटिक्लिन्दवत्॥ तस्मान्नामकर्मदन्तजननयोरेव कालोपलक्षणत्वं॥ न तु
चूडाकरणस्य॥ एवमुपनयनस्यापि॥ वचनबलान्तु त्रिवर्षादूर्ध्वं प्रकृत तु स्यादपि अ ह इति॥ यत्तु वाचस्प
तिना प्रमवचनेन संवत्सरे पूर्णे इत्येवं द्वितीयत्वाभावात् दानर्थक्यपरिहारार्थं तत्र पूर्णा इत्यनुषज्यते तृतीयपदार्थ
क्यपरिहारार्थं तस्य तृतीयवर्षचरमावयवपरत्वं पूर्वस्य तु तद्प्रथमावयवपरत्वमिति व्याख्यातं तत्र क्लेशाः कृताः सा

Indira Gandhi National
Centre for the Arts

कारश्चर्मे ले यास्तान निषेधनः॥ त्रिदिनमितरथा प्रागन्नताल॥ ततो यावद्वर्षाद्धं त्रिमात्रतादुपनयनपर्यंतमितरथापि
कुलधर्मापेक्षयाऽकृतचौलेऽपि परेते त्रिदिनं॥ कृतचौले तु प्रागुपनयनात्सर्वं दात्रिरात्रमुक्तमेव॥ तथा चांगिराः॥
यद्यप्यकृतचूडो वै जातदंतस्तु संस्थितः॥ दाहयित्वा तथाप्येनमाशौचं त्र्यहमाचरेदिति॥ इदं च वचनं विप्रस्य न
त्रिवर्षं तु मते शुद्धिस्तु नैशिकी इति तेनैवाभिहितत्वात् नृकृतं त्रिवर्षाकृतचूडविषयमिति मिताक्षराकारैरस्मिन्नर्थे
भवति मूलं॥ द्वितीयपक्षे पादमेव मूलं॥ न च तस्मिन्पक्षे पूर्ववाक्यस्य त्रिवर्षो त्रिवर्षाभयविषयत्वेऽत्रिवर्ष
यवस्थाविषये समपूर्वैकवादाहस्यैवेति विवक्षितं त्रिवर्षे तु दाहस्यानिषेधादविवक्षितमिति वैरूप्यं स्यादिति
वाच्यं॥ अत्रिवर्षविषयादेवास्माद्दंडापूपन्यायेनास्यार्थस्य सिद्धेः॥ आव्रतादेशो चा॥ आव्रतादित्यपूर्वा
वधिसमर्पकत्वेनापि सवर्ण्यते मत्प्रागतत्वेन विशेषाग्रहणादप्युक्तिर्नाख्य॥ उपनयनात्प्रभृति उपरमब्रा
ह्मणादिजातिनिमित्तं दशाहादिरशौचं तेषां सपिंडानां भवतीति वक्ष्यमाणमेव नैराकांक्षार्थमुक्तं॥ तथा
चेयाज्ञवल्क्यः॥ त्रिरात्रमाव्रतादेशाद्दशरात्रमतः परमिति॥ दशरात्रमिति जात्याशौचोपलक्षणं॥ अशौच
मित्यशौचशब्दस्य नञ्समासः॥ तेन नोभयपदवृद्धिः॥ अर्वाग्मासाधकस्यास्या वा शौचस्य मातापित्रो
रपवादमाह॥ मातापित्रोस्तु पुत्रे त्रिदिनमदशाने॥ नाम्नः प्रागुक्तस्याशौचस्यापवादः किल दंतजाता
कृतकस्यैवेति प्रदर्शनार्थमदशानग्रहणं न तु सदशानवत्सर्पि॥ नामकरणादूर्ध्वं यावदुपनयनं पुत्रे अपत्ये हरेव ॥५॥

परेते यो वस्थादिविशेषानाश्रयणेन मातापित्रोस्त्रिदिनमाशौचं॥ पुत्रग्रहणमुपलक्षणं॥ बालानामजातदंता
नां त्रिरात्रेण शुद्धिः वैदिकादत्यसंबंधादनुरूपादेव अहमितिवत्सामान्येन स्मरणात्॥ प्रजातासु योषित्सु संस्कृता
संस्कृतासु च॥ मातापित्रोस्त्रिरात्रं स्यात् इतरेषां पृथग्विधीति शंखवचनेन स्नापसपिंडत्रिरात्रविधानाच्च॥ इदं च
स्नापस्य रात्रेदंतजननादुपरि अजातदंतासु पित्रोरेकरात्रमिति काश्यपविभिवचनादिति माधवीये विशेषः॥
सन्निधौ न च चैषः॥ एवं निर्दिष्टे नात्र पत्रस्थे नाशौचकालमध्ये मरणवार्ताश्रवणे तस्योच्यते॥ तादृशसंनिधौ
नष्टे चेष्टमृते पृथक् शोचकं ज्ञात्वाशौचमिति रिक्तं सकलमरणाशौचं भवति॥ तत्र प्रथमदिनश्रवणे पूर्णतादृगाशौ
च दिनमध्ये श्रवणे तच्छेषः॥ अतिक्रांते तोशौचकाले श्रवणे जातासौ नवन्यासील सर्पः॥ तथा च याज्ञवल्क्यः॥ प्रो
षिते तु विषमं तस्मिन्ने वातिकालं जामिति॥ वक्ष्यमाणाद्दशाहं साश्वतीति विशेषणेनाचार्यामरणवदनुपनीत
मरणे पतिकोतालशौचनिषेधादग्रेदुक्तविवक्ष्यमाणोन द्विवर्षाविषयमतापितासादर दशाहं पक्षेत्पनुपनीताप
रति मिचलादति कालाशौचेनास्तीति प्रदर्शनार्थमिदमुक्तं॥ २॥ ॥ अकृतचूडे वर्षेऽप्रभयोः सूतकं मातुरेव
हो सस्पविशानिश्वरकृते प्रथम॥ व्याख्यानमपि प्रसाहः॥ कुनदवे लसज्जे जनिकरे जननी सोदरा ज्ञांदर
शाहः॥ योगीश्वरवाक्ये कृतचूडे वर्षग्रहणात्प्राक्पूर्ववद्ग्रहणमस्मिन्पक्षे न तु पूर्णद्विवर्षयावत्सर्पंतत्राशौ
चस्य सुतरां तावत्सत्वात्॥ तस्मिन्नसंस्रवे मतजातानेकरस्यापि तु जनन्याः सोदराणां च दशाहमाशौचं इतरसपिं

Indira Gandhi National Centre for the Arts

डानां तूर्क्तं ॥ इदं च पित्रोर्लेन नाद्यूर्ध्वमेव सोदराणां तु नामकरणादूर्ध्वं देयमित्यं ॥ तथा च पैठीनसिः ॥ गर्भस्थे प्रेते मातु
रेकाहं जाते उभयोः कृते नाम्नि सोदराणां चेति ॥ जन्मनो शौचकाले मध्ये सपिण्डाशौच प्रतिपादके स्त्रीहं चात्रिरा
त्रादि प्रतिपादके मन्वादि वाक्य विरोधो लोक विशिष्टलीस्त्रा स्यपक्षस्य निवपकारे रनादरादन्तर्दश वर्ष पद वै
पथ्यापत्ते श्रयाः स्वलक्ष वचनस्य तत्परत्वेन व्याख्यानस्य सुतरामयुक्तत्वाद्दूतौ पद्याख्यानमभिप्रेत्याह यद्वा
स्वत्र्यपलमनाभिक्कमह विषये शौचं तु त्रिरात्रं ॥ इह विषये तु नंदू वर्षमतेपित्रोः अस्वत्र्यपलमिलते षां
स्वत्र्यायोग्यत्वमेव तु रसापिंडापेक्षया धिकं ॥ अस्वत्र्यपलाव धिच वक्ष्यति ॥ अथ निय नेत्यादिना ॥ आशौचं तु क
र्मानधिकाररूपं पित्रोस्त्रिरात्रं सोदराणां त्वितरसपिंडवदेवेत्युद्दशाह ॥ एवं च पित्रिन्तरसपिंडानामन्नत्यब्दे
पत्नेअनुगमनं नियमनन्नास्यस्तरिपतां किं तु पूर्णद्विवर्षापरमेव वक्ष्यमाणं व्याधिक्यं सकलं भवति ॥ तथा
च स्मृत्यंतरं तु नंदू वर्षे संस्थिते उभयोरवेनं तरेषां मिति ॥ इदं च कर्मानधिकार लक्षणस्याशौचस्यानिषे
धमशक्यत्वादस्वत्र्यपलस्यैव नि षेधकं सत्तकमातुरेवहि सवपदव्याख्यानाविभिनीक्षरापूर्वा लोचनया वि
दुषां क्वचिदन्यथा पीदमेव व्याख्यानमभिप्रेतमिति लक्ष्यते ॥ अर्वागित्यादिनोक्तस्येतरसपिंडाशौचस्य कन्या वि
षयेपवादमाह ॥ स्त्रीणामस्नानेन शुध्यत्रिपुरुषं विषयमातिराशौच कालाद ॥ नाम्नाद्यूर्ध्वमाशौचं लपर्य
तमकृत चोलासु स्त्रीषु प्रेतासु त्रिपुरुषविषये तु आसप्तमात्रयादपुरुषत्रयपर्यंतसपिंडः स्नानेन शुध्येदि

णा ८
हेरंब
॥६॥

तथा चापस्तंबः अप्रत्तानां तु कन्यानां सपिंडाशौचं विधीयत इति ॥ वसिष्ठोपि अप्रत्तानां तु स्त्रीणां त्रिपुरुषी विज्ञा
यत इति ॥ नतीयवर्षपरे काल ऊर्ध्वं अनुवर्तितव्या नीव्यपदेशदूर्ध्वं नु लप्यमिवशाकृतचूडाया अथहोरात्र स्यहलाने ॥ न
तु सपिंडाशौच प्रतिपादके ऋषिवाक्य कालोपलक्षण प्रदर्शनपरं तस्य पवीनपुंसके पुंसलात्मपमवर्षं चूडाया अपि
सपिंडाशौच प्रसंगाच्च ॥ तस्माद्यदा कदाचित्क्रियमाणचौलपर्यंतं सपिंडाशौचं तदूर्ध्वं प्रागवाग्दानमहोरात्रं ॥ तती
यवर्षादूर्ध्वमकृतचूडायामपि यावद्वाग्दानमेव पुंसवस्यैव हेवत्रित्रपामेकाहरस्य तीर्थे वृद्धिर्द्विवक्ष्यति ॥ अर्वाग्वा
ग्दानतो हृद्य चौलाल तीयवर्षाच्चोर्ध्वं वाग्दानेयावत्स्त्रीषु प्रेतासु त्रिपुरुषविषये तु नियरहोरात्रेणशुध्यति ॥
तथा च योगीश्वरोक्तं ॥ अहस्त्वदत्तकन्यासु बालेषु च विशोधनमिति ॥ इदं चाकृतचूडायां सपिंडाशौचं विधानोत्त
रूर्ध्वमविशेषेण वर्णानामविकृतसंस्कारक्रमेण त्रिरात्रान्तु भवेच्छुद्धिः कन्यास्वहो विधीयत इत्यंगिरावच
नेपत्रपुंसपत्नी त्रिरात्रं तत्र कन्यास्वहोरात्रं विधानात्ततो यवर्षादूर्ध्वं वाकृतचूडायामपि प्रवर्त्ततेइतिनिबं
धणाम भिप्रायोल क्ष्यते ॥ त्रिभिरूपयमनाद्दूर्ध्वं गोत्रस्वकस्य ॥ वाग्दानादूर्ध्वमुपयमनाद्विवाहाद्र्वाक्स्त्री
षु प्रेतासु भर्तृगोत्रे स्वकेपितृगोत्रेचसप्तमपर्यंतं त्रिभिरहोरात्रैः शुध्येत ॥ तथा च मरीचिः अवाग्दत्ते
प्रत्तानु प्राणे च प्रतिपादिताः ॥ असंस्कृतासु साज्ञेयास्त्रिरात्रमुभयोः स्मृतमिति ॥ विवाहादूर्ध्वं तु वक्ष्यति ॥ ४॥ ७
जन्मन्यप्येतमसाधपि चदशनिशाह द्वादशाहानि पक्षमासं वर्णाः क्रमेणाशुचयः उचित केवलं दूजातिस्त्र

Indira Gandhi National
Centre for the Arts

त्रिं॰टी॰
॥७॥

पक्षं॥ जन्मनि पूर्णे प्रसवे तु पितरौ वापेतउपनीतस्कन्नमसावपि वउसन्नमतसपिंडा ब्राह्मणक्षत्रियवैश्यशू
द्राः क्रमेण दशद्वादशपंचदशत्रिंशदहोरात्राण्यशुचयः स्युः॥ उचितकृतचूडशुश्रूषादिस्वधर्मानु
ष्ठानपरः शूद्रस्तु पक्षं पंचदशरात्रमशुचिः स्यात्॥ तथा च याज्ञवल्क्यः॥ दशरात्रमतः परं॥ त्रिरात्रं
दशरात्रं वा शावमाशौचमिष्यते॥ क्षत्रस्य द्वादशाहानि विशः पंचदशैव तु॥ त्रिंशद्दिनानि शूद्रस्य तदर्धं
न्यायवर्तिन इति॥ उपनयनस्य च यद्वीविषयत्वं त्रैवर्णिकपुरुषविषयं स्त्रीशूद्रयोस्तु विवाहस्य यद्वीव
यिकत्वं ज्ञातं शौचे च योनिमित्तशौचे चोत्तरावयित्वं इष्टं॥ वैवाहिको विधिः स्त्रीणामौपनायनिकः
स्मृतः इदस्योपनीतपुरुषाधिकारिकधर्मेषु स्त्रीणां विवाहितानामधिकारप्रतिपादनार्थत्वात्॥ ततो
दत्ता भर्तुरेव हि॥ स्वजात्युक्तमाशौचं तस्यास्तत्रैव जातके तथैव तु ब्रह्मपुराणीयविशेषवचनात्॥ स्त्री
शूद्रयोश्च समानधर्मत्वात्॥ बहुकालमविवाहितस्य शूद्रस्य षोडशाब्दात्पूर्वं मरणे मासाशौचं॥ अ
न्ये त्वाहुः शूद्रस्य षोडशाब्दात्परं विवाहस्य समधिगच्छेन्मासाशौचमपि वा पूर्ववाः॥ शूद्रं समधिग
च्छेति नात्र कोऽपि विवादः शाति शंकरस्मरणात्॥ अत्र दक्षः स्मृतौ सपञ्चशौचे लप्यकाहस्त्र्यहश्चतुरहस्त
था॥ षड्दशद्वादशाहाश्च पक्षो मासस्तथैव च॥ मरणान्तं तथा चान्यद्दशपक्षास्तु सूतके सप

हेरंब
॥७॥

क्रमप्रत्यर्थताविज्ञानाग्निवेदमंत्रैः समन्वितं॥ सकल्पं सरहस्यं च क्रियावांश्चेन्न सूतकं॥ एकाहाद्ब्राह्मणः शुध्ये
द्योऽग्निवेदसमन्वितः॥ हीने हीनतरे चैव त्र्यहश्चतुरहस्तथेत्यादिना एकाहाद्ब्राह्मणः शुध्येद्योऽग्निवेदसमन्वितः
॥ त्र्यहात्केवलवेदस्तु द्विहीनो दशभिर्दिनैरित्यादिस्मृत्यंतरे च ब्राह्मणस्य॥ क्षत्रियस्तु दशाहेन स्वकर्मनि
रतः शुचिः॥ तथैव द्वादशाहेन वैश्यः शुद्धिमवाप्नुयात्॥ शूद्रो विंशतिरात्रेण शुध्यते मृतसूतके॥ त्रिंशद्दिना
नि शूद्रस्य तदर्धं न्यायवर्तिन इत्यादिवचनैश्च क्षत्रियवैश्यशूद्राणामपि॥ उपाधिविशेषोपादानपुरःस
रं संकुचिताशौचकल्पाः प्रतिपादिताः सर्वेषामेव वर्णानां सूतके मृतके तथा॥ दशाहाच्छुद्धिरेतेषामि
ति शातातपोऽब्रवीत्॥ पंचदशरात्रेण राजन्यो विंशतिरात्रेण वैश्य इत्यादिवचनैश्च सामान्यत एवोक्ता
वचा आशौचकालाः प्रदर्शिताः तत्र व्यवस्थिताशौचकल्पप्रतिपादकानां तावदग्निवेदकार्याग्निहोत्रादि
स्वाध्याय यविषयता॥ इज्यार्जनविनासीदत्कुटुंबार्थं च स्नानिकादिकृतं कृतज्ञरणोपयोगि इज्यार्जनवि
षयता च विज्ञानेश्वरादिभिः प्रपंचेन प्रतिपादितेव॥ सामान्यतः प्रवृत्तानां तु मनुपाराशरलस्यादिमहास्मृ
ति विरोधात् शिष्टसमाचाराभावाच्चेयद्यपि तैरनादरणीयत्वमेवोक्तं तथापि मन्वादिप्रोक्ताल्पकालाशौचपक्षपातः काला
शौचप्रतिपादकानां तावद्यस्य यावति काले येन विना सभावस्त्वस्य तद्विषये तावत्कालाशौचप्रतिपा

Indira Gandhi National
Centre for the Arts

त्रिं.शी.
११८

दत्तत्वेन पूर्ववत्तुल्यत्वेव॥ अत एव दशाहं त्र्यहं वा मातुराशौचं सपिंडेषु विधीयते॥ अर्वाक् संचयनादस्थ्नां त्र्यहमेका
हमेव वेति सामान्यप्रवृत्तमपि मनुवचनं कुल्यलोपान्यकोवास्यालुंभो पान्यके एव वा॥ अहेहि को वा पिमवे
दत्वस्तमिक एवेवेति प्राक् प्रतिपादितं चतुर्विधग्रहस्थाश्रमिप्रायमिक्लं मिताक्षरायां॥ अधिकृका
लाशौचप्रतिपादकानां तु जातिमात्रक्षत्रियादिविषयत्वे सपिवन्नं शक्यमिसाद्दिरन्यत्र विस्तरः॥ सोद
क विषयाच्चावचाशौचं कृत्स्नप्रतिपादकानामप्येवं व्यवस्था॥ मातृवस्तु दशाहादशाहादिमनाशौचं चके
लापुगांतरविषयाः॥ रक्तस्वाध्यायसापेक्षमपसंकोचनं तथेतिस्मृत्यंतरात्॥ दशाहमेवेविप्रस्य स
पिंडमरणे सति॥ कृत्स्नांतराणि कुर्वाणः कल्ले भवति किल्बिषीति हारीतवचनाच्चैसाहा॥ एतच्चब्राह्मणा
दिग्रहणात्सजातीयविषयमेव॥ विजातीयेषु तु ब्राह्मणादेर्मृगीवशिष्ठादिषु लावदनंतरे षडहमेकांतरे
त्र्यहो द्व्यंतरे एकरात्रं॥ तथा च हारीतेनोक्तं॥ दशाहाच्छुध्यते विप्रो जन्महानौ स्वयोनिषु॥ षड्भिस्त्रिभिरथै
केन क्षत्रविट्शूद्रयोनिष्विति॥ बोधायनेन तु स्वजात्याशौचमेव तत्रापीष्टं॥ क्षत्रविट्शूद्रजातीया ये
स्युर्विप्रस्य बांधवाः॥ तेषामशौचे विप्रस्य दशाहाच्छुद्धिरिष्यतईति॥ अनयोश्च पक्षयोर्जातिमात्रस्वधर्म
परविषयत्वेनापदनापदिविषयत्वेन वा व्यवस्था॥ मृगीवशिष्ठादिब्राह्मणादिषु तु जातमृते जाताशौ

चं द्रष्टव्यं॥ तथा च विष्णुः॥ ब्राह्मणस्य क्षत्रियविट्शूद्रेषु षड्रात्रत्रिरात्रैकरात्रैः॥ क्षत्रियस्य विट्शूद्रेषु षड्रात्रत्रिरात्रा
भ्यां॥ वैश्यस्य शूद्रे सपिंडेषु षड्रात्रेण शुद्धिः हीनवर्णानामुत्कृष्टेषु सपिंडेषु जातेषु मृतेषु वा तदाशौचव्यपगमे शुद्धिरिति
॥ मृगीवशिष्ठादीनां सजातीयसपिंडेषु तु क्षत्रियादिजोत्साशौचं॥ ब्राह्मणात्क्षत्रियायामुत्पन्नः क्षत्रिय एव क्षत्रिया
दैश्यायामुत्पन्नो वैश्य एव वैश्यायाः शूद्रायामुत्पन्नः शूद्र एवेत्यस्य मृगीवशिष्ठादीनां क्षत्रियादिरूपेणाप्रतिपादनार्थ
त्वात्॥ सूतादिप्रतिलोमजानां प्रतिलोमाधमहीनोइतिस्मरणादाशौचं नास्त्येव॥ केवलं जननमरणयोर्मूत्रपुरीषो
त्सर्गवन्मलापकर्षणार्थं शौचमात्रमितिविज्ञानेश्वरः॥ माधवादयस्तु यस्मिन्निमित्ते शूद्रस्य यदाशौचं तस्मिन्नि
मित्ते प्रतिलोमानां तदेव॥ शौचाशौचं प्रकुर्वरन् शूद्रवद्वर्णसंकराइति ब्रह्मपुराणवचनादित्याहुः॥ तथा सस
पिसपिंडत्वे आनंत्यं स्युस्सुतकारंदिसुतपुत्रेषु मृतेषु चवीलिक्षत्रियाणां प्रतिलोमजन्मानां प्रसूतासु पत्नीषु अस्त
तासु मृतासु च पूर्वापरपक्षयोश्च त्रिदिनमाशौचं नेतु दशाहादि॥ तथा च त्रिरात्रेण शुध्यंति इत्यनुवृत्तौ विष्णुः॥ अनौर
सेषु पुत्रेषु जातेषु च मृतेषु च॥ परपूर्वासु भार्यासु प्रसूतासु मृतासु चेति॥ अनौरस पदेन चौत्रौरसः धर्मपत्नीजः
इति पुत्रिकाषितौरसक्षित्रागमंते॥ तन्नवीतिकोपिसत्रजादौ त्रिरात्रसिद्धिः॥ अत एव बृहस्पतिनाथ साम्प्रते
पुत्रदारेषु परपत्नीसुतेषु चेत्युक्तं॥ यस्त्वौरसः एव दानेन क्रयेण वान्यस्य पुत्रीकृतः तत्र यद्यपि तु न त्रिरात्रं पूर्वसंबंध
निवृत्तेश्चानदशाहादीति प्रतिभाति॥ परपूर्वाग्रहणाच्च यद्यपि द्वितीयपक्षेरेव त्रिरात्रमिति प्रतीयते तथापि बार्हस्प

Indira Gandhi National
Centre for the Arts

संस्थाश्रितग्रहणात्सर्वस्यापि॥ पितृपत्नि सपिंडानां तु एकरात्रं॥ तथा च मरीचिः॥ सूतके मृतके चैव त्रिरात्रं परपूर्वयोः॥
एकाहस्तु सपिंडानां त्रिरात्रं यत्र वै पितुरिति॥ पितृग्रहणं पत्न्युपलक्षणं॥ हारीतोऽपि॥ परपूर्वासु भार्यासु पुत्रेषु कृ
तकेषु च॥ भर्तृपित्रोस्त्रिरात्रं स्यादेकाहं तु सपिंडत इति॥ याज्ञवल्क्येन तु पित्रोः प्रसोऽश्रेकाह उक्तः अनौरसेषु पुत्रेषु
भार्यास्वन्यगतासु चेति॥ तस्य चासंनिहितविषयत्वे निर्गुणविषयत्वे वा त्रिरात्रैकरात्रयोः सवर्णासवर्णविषयत्वेन
व्यवस्थेत्यपि कश्चित्॥ एकाहपक्षे च सपिंडानां स्नानमात्रं॥ एवं च अन्याश्रितेषु दारेषु परपत्नीसुतेषु च॥ गोत्रिणः
स्नानशुद्धाः स्युस्त्रिरात्रेणैव तत्पितेति प्रजापतिवचनेन समभिव्याहारात् पितृपत्नीसपिंडत्रिरात्रस्नानयोः सं
त समानविषयत्वं यद्यपि प्रतीयते तथापि त्रिरात्रविषये सपिंडानां मरीचिहारीतवचनाभ्यामेकाहविधानात्सामा
न्यतः समानविषयत्वाङ्गीकारेण पूर्वोक्तो वान्तरविषयविभागः कल्पनीयः॥ एवं च सद्यःशौचानुवृत्तो अन्यपूर्वा
सु भार्यासु पुत्रेषु कृतकेषु चेति शंखलिखितवचनमपि भार्यापुत्रयोरुद्धयोः संबन्धिभिराद्धत्वादुपस्थितयोः प्रति
पित्रोः सपिंडानामभिसंव्याहारेण सपिंडविषयमेव व्याख्येयं॥ अति अपमजातीयभार्यायोऽशास्त्रीयपुत्रविषयमिय
पितृकत्वे॥ भिन्नपितृके सोदरे च जाते एकाहः मृते त्र्यहः॥ तथा च मरीचिः॥ मात्रैकया द्विपितृकौ भ्रातराव
न्यगोचरौ॥ एकाहः सूतके तत्र त्रिरात्रं मृतके तयोरिति॥ वानप्रस्थे यतौ वा परमृति कुलजे पिंडके वाप्लवः स्यात्॥ कु
लजे सगोत्रे सपिंडे वानप्रस्थे यतौ संन्यासिनि पिंडके तृतीयपञ्चके तौ वा परमृते आप्लवः स्नानमात्रमवकु



द्विरेतुः स्यात्सर्वेषां॥ तथा च पराशरः॥ देशांतरमृतं श्रुत्वा क्लीबे वैखानसे यतौ॥ मृते स्नानेन शुध्यंति गर्भस्रावे च गो
त्रिण इति॥ इदं च स्नानमौर्ध्वदैहिककर्मभिन्नविषयं॥ संनिहितसपिंडलाघनापादनाभिसंधौ शौचमात्रापवादत्वे
नौर्ध्वदैहिकानुष्ठानानिमित्ततदपवादाभावात्॥ एवमग्रेऽपि॥ यतेस्त्वौर्ध्वदैहिकमेव नास्ति॥ कुलजग्रहणमाशौचप्रया
जकानां यसंबंधमात्रोपलक्षणं॥ यापि ज्ञाविह शुश्रूषेमतवलितुहिनं॥ पोषितानां गवां विप्राणां गुरुरक्षणाय मृत
ततत्संबंधिनां दिनमहोरात्रमाशौचं॥ तथा च स्मृतिः॥ ब्राह्मणार्थे विपन्नानां योषितां गोग्रहेऽपि च॥ आहवेऽपि हतानां
च एकरात्रमशौचकमिति॥ आहवे हतविशेषमाह वृद्धविद्धे॥ ...यः॥ विद्धशब्दो मतलक्षणार्थः॥ युद्धमभिम
ते सद्यः स्नानमात्रेण शुद्धिः॥ एके योगनिर्दिष्टत्वात्पूर्वत्रोपलक्षिते युद्धहतविशेषोपादानार्थस्तीर्थशब्दोऽर्थवादः॥
तथा च मनुः॥ उद्यतैराहवे शस्त्रैः क्षत्रधर्महतस्य च॥ सद्यः संतिष्ठते यज्ञस्तथाशौचमिति स्थितिरिति॥ अत्रापि
नेरि साहि विशेषणबलाद्युद्धे नेदं मृते नेतीति॥ तथा च पूर्ववाक्यमुद्धृत्य क्षतेन कालांतरमृतविषयं॥ अत्र च औ
र्ध्वदैहिककर्मपुरःसरास्ता नाशस्तु सद्यः संतिष्ठते यज्ञस्तथालोशौचमित्यत्र कर्मनि॥ ५॥ ॥६॥ शावेऽतीते दशाहात्प्रभृति
विषये प्राक्त्रिमासात्त्रिरात्रं पक्षिण्याषण्मासादर्वाग्दिनमहर्नवमासात्ततः स्नानमात्रं॥ विषयो वक्ष्यमाणल
क्षणदेशांतरजिन्ने यस्मिन्देशे आशौचाभाविनः संति तस्मिन्नेव देशे उत्पन्ने दशाहात्प्रभृति दशाहादिके ब्राह्मण
लोदिशातिप्रपुत्रे शावमृतिनिमित्ताशौचेऽतीते ज्ञाते सति दशाहादिकालपरिछेदाशौचनिमित्तेऽपि मरणाद
शाहात्पुनर्ज्ञाते सतीति यावत्त्रिमासात् तृतीयमाससमाप्तेः प्राक् त्रिरात्रं॥ ततः षष्ठमाससमाप्ति

Indira Gandhi National
Centre for the Arts

त्रि.टी.
॥१०॥

आप्यत समाप्तिपर्यंतं पक्षिणी आगामि वर्तमानाहि प्रथममध्यगतारात्रिः ॥ तद्ध्वं नवममासमभिव्याप्य तत्समाप्ति
पर्यंतमहरेव पूर्वमहोरात्रं ॥ ततो नंतरं उदकदानसहितं स्नानमात्रं कालनिरपेक्षं शुद्धिहेतुः स्यात्सपिंडानां ॥ नवु
त्रिणीतस्य मरणादिशौचं चेन्निमित्तं बालतत आरभ्य पूर्णं दशाहादि प्रवर्तते सर्वः ॥ तथा च वृद्धवसिष्ठः ॥ मासत्रयं त्रि
रात्रं स्यात्षण्मासे पक्षिणी तथा ॥ अहस्तु नवमादर्वागूर्ध्वं स्नानेन शुध्यतीति ॥ स्नानं नोदकदानसमं पूर्वबलस्य तेत्स
रात्रं स्यात्षण्मासे पक्षिणी तथा ॥ अहस्तु नवमाद्वर्गूर्ध्वं स्नानेन शुध्यतीति ॥ स्नानं नोदकदानमप्युपलक्ष्य तेस
वर्षात्वर्षात्पूर्णे प्रेते दत्तोदकं शुध्यतीति याज्ञवल्क्यवचनात् ॥ यत्तु मानवे संवत्सरे व्यतीते तु स्पृष्ट्वैवापो विशुध्यति
तद्दूर्ध्वमपि स्नानशास्त्रसत्यं नेतु वर्षमध्येनव मासं
तथा कारणे तेल्कीलनिरपेक्षं ॥ अत्र चैवाक्ये संवत्सरग्रहणं तद्दूर्ध्वमपि स्नानशास्त्रसत्यं नेतु वर्षमध्येनव माद्
ध्वमप्युपलक्षणं ज्ञातव्यम् अग्निप्रायेण उदाहृत वसिष्ठवचनात् ॥ श्रावग्रहणेन दशाहाद्याशौचानिमित्तं भूतस्य जननस्य
दशाहाद्यनंतरं श्रवणेपि तत्र्यातिरिक्तो नामाशौचं नास्तीति दर्शयति ॥ तथा च देवलः ॥ नाशुद्धिः प्रसवाशौचे व्यतीते
पुत्रिकेत्यपीति ॥ पितुस्तु स्नानमात्रमस्त्येवानिर्दशाहातिमरणेष्वपि पुत्रस्य जन्मनि च ॥ सवासा जलमाप्लुत्य शुद्धः
स्यादिति मानवेन मनुवचनात् ॥ एतच्च पुत्रग्रहणं जन्मन्यतिक्रांताशौचाभावस्यापकं अन्यथाशौचजन्मनि
दर्शयति ॥ दशाहाद्यनंतरं तु पौनःपुन्येन त्रिरात्राद्याशौचं विनिमित्तं भूतानुपनीतादिप्रायश्चित्तातिक्रांताशौ
चस्मिन्स्यादिवाद्वयस्य ॥ दशाहादयः सर्वे नीत्येनैव त्रिरात्रादि ॥ तथा स्मृत्यंतरे ॥ उपनीते तु विषमं तस्मिन्नेवोतिकालजमिति ॥ अत्र यद्यप्युपनी
तेनास्तीति दर्शयति ॥ तथा स्मृत्यपवादः ॥ उपनीते तु विषमं तस्मिन्नेवोतिकालजमिति ॥ अत्र यद्यप्युपनी
तेनास्तीति दर्शयति ॥ तथा स्मृत्यपवादः ॥ उपनीते तु विषमं तस्मिन्नेवोतिकालजमिति ॥ अत्र यद्यप्युपनी
तेनास्तीति दर्शयति ॥ तथा सप्ताप्रवादः ॥ उपनीते तु विषमं तस्मिन्नेवोतिकालजमिति ॥ अत्र यद्यप्युपनी
तेनास्तीति दर्शयति ॥ तथा सम्प्रवादः ॥ उपनीते तु विषमं तस्मिन्नेवोतिकालजमिति ॥ अत्र यद्यप्युपनी
तग्रहणाद्नुपनीतपर्युदासपाचार्यसोदकादिप्रायश्चित्तातिक्रांताशौचे प्रस्मात एवं तथापि त्रिरात्राहोरात्रा

आशौचं निमित्ते समरणे त्रिरात्राद्यनंतरं ज्ञातेः पक्षिस्यो विशेषेण त्रिरात्राद्याशौचविधानस्यानुपपत्त्वादतिक्रांते दशाहेत्व
घाशौचनिमित्ते मरणे त्रिरात्राद्यनंतरं ज्ञाते पक्षिस्यो विशेषेण त्रिरात्राद्याशौचविधानस्यानुपपत्त्वादतिक्रांते दशाहेत्व
लिति च मनुवचने स्पष्टमेव दशाहग्रहणाद्दशाहादिजातीयाशौचविषयत्वमेवातिक्रांताशौचविधेर्युक्तमिति स्पष्टमेव द
शाहात्प्रतीतम् ॥ रुद्रधरेण तु प्रोषिते कालशेषः स्यात्पूर्णे दत्तोदकं शुध्यतीति याज्ञवल्क्यवचनपाठानुसारेण
मानवेनिर्दशाग्रहणस्यानिःक्रांता शौचकालपरत्वं संगीकृत्य त्रिरात्राद्याशौचातिक्रमेपि स्नानोदकदानमात्रमुक्तं
॥ दशातेर विशेषस्य वक्ष्यमाणत्वाद् पृथग्गृहीतम् ॥ अंतरा तु वक्ष्यति ॥ देवलेन तत्र पठितम् ॥ आत्रिपक्षात्त्रिरात्रं स्या
त्षण्मासात्पक्षिणी ततः ॥ परमेकाहवर्षाद्धूर्ध्वं स्नाता विशुध्यतीति ॥ स्नानविषये दशेकमिताक्षरायां प्रेअर्वाकू
संवत्सरादित्युक्तं प्रायेण विषयः ॥ अंत एवात्र नवमादूर्ध्वमविशेषेण स्नानमुक्तं ॥ स्नाने दशाहेतरस्तु ॥ दशा
तरस्तु ज्ञाताशौचनिमित्ते जातिमरणे दशाहाद्युत्तरं ज्ञाने अविशेषेण स्नानोदकदानमात्रेण तु त्रिरात्रादि ॥ तथा
च स्मरणं दशातरमतेर्थकालेष्वादित्यकर्णदत्तोदकं शुध्यतीति च ॥ पूर्णे आशौचकाले ॥ पराशरवचनमपि ॥ भृग्वग्नि
मरणे चैव दशातरमतेतथा ॥ बालेप्रेते वसंन्यस्ते सद्यः शौचं विधीयत इति ॥ आत्रिपक्षादित्यादि सामान्यवचनैर्नि
हितस्य वर्षाद्यंतरे त्रिरात्राद्याशौचस्य दशातरमते पिप्राप्तौ कथं सद्यः शौचमित्याशंक्य निरवकाशं विशेषविहि
तत्वादिति त्रिरात्राद्यादेस्तत्राप्रवर्तनेन प्रमुखवनानुवादपरं वैकं दशांतरमतेः सम्यक् विवरणमुक्त
नसद्यः शौचेनविरोधात्त्रिरात्रादेस्तत्रापवर्तनेन ॥ नत्रिरात्रमहोरात्रं सद्यः स्नात्वा शुचिर्भवेदिति ॥ सगा
नसद्यः शौचेनविरोधात्त्रिरात्रादेस्तत्रापवर्तनेन ॥ नत्रिरात्रमहोरात्रं सद्यः स्नात्वा शुचिर्भवेदिति ॥ सगो
त्रवचने ॥ दशांतरमतः कृत्स्नसगोत्रः अधुनेपदि ॥ नत्रिरात्रमहोरात्रं सद्यः स्नात्वा शुचिर्भवेदिति ॥ सगो
त्रशब्दोत्र सपिंडपरः ॥ तत्परं गोत्रमुच्यते इति परिभाषितेषु चतुर्दशपुरुषान्तरेषु सगोत्रेषु समानोदकेषु

वत्सरे वीजोपवस्यात्रिरात्राद्यतिक्रांताशौचस्याशौचे एव तन्निषेधानुवादासंभवात्॥ यत्तु माधवेन पूर्ववचनं संव
त्सराभ्यंतरेऽप्यसपिंडविषयमुत्तरं तु संवत्सरादूर्ध्वं सपिंडविषयमिति पराशरवचनेन द्वयं व्याकुर्वता देशांतरमृते
ष्यतिक्रांताशौचं त्रिरात्राद्यंगीकृतं तत्सपिंडविषयपूर्वोत्तरसंदंशस्य पूर्ववचनगतदेशांतरमृतग्रहणस्या
सपिंडविषयत्वोपेक्षायाः निर्बीजत्वादुत्तरवचनस्य च संवत्सरोर्ध्वविषयत्वोपेक्षायाः संवत्सराभ्यंतर एव
स्वाहितस्य त्रिरात्रादेस्तदूर्ध्वं प्राप्त्यभावादेव तन्निषेधानुवादासंगतेरप्युक्तत्वादयुक्तं॥ यत्तु पूर्ववचनेऽस्या
सपिंडविषयत्वार्थं संवादेन बाले देशांतरस्थे नृपचोक्ष्य देवे संस्थिते॥ सवासा जलमाप्लुत्य सद्य एव वि
शुध्यतीति मनुवचनमुपन्यस्य तत्र देशांतरस्थेन वा सपिंडो विशेष्यत इत्युक्तं तत्र श्लोके चकारं श्रवणा
हृत्यतां पुनः॥ य[...]दृष्यवीकृ त्रिपक्षात्त्रिनिशं षण्मासात्पक्षिणीं दिवानिशं॥ अहः संवत्सरादूर्ध्वं देशांतरमृते त
ष्यपीति दिवानिशाशब्देन पक्षिण्यभिधानस्यासंभवादसंगतोऽयं विभागः समानं तु तेरयं येष्वदृष्टं विष्णु
वचनमुदाहृतं॥ तत्र देशांतरशब्देन तत्परिभाषितदेशांतरग्रहणं किंतु प्रोषितमात्रग्रहणं देशांतरगतो वि
प्र इति पराशरवचनगतदेशांतरग्रहणं यदि तत्सर्ववचनानामविरोधः॥ अत्र लोके वृद्धसोमेश्वरादिबहुति
वृद्धसंमतः पक्षो युक्तः॥ देशांतरलक्षणं च बृहस्पतिनोक्तं॥ महानद्यंतरं यत्र गिरिर्वा व्यवधायकः॥ वाचो यु
त्र विभिद्यंते तद्देशांतरमुच्यते॥ देशांतरं वदंत्येके षष्टियोजनमायतं॥ चत्वारिंशद्वदंत्यन्ये त्रिंशदन्ये तथैव च

चेति॥ एतेषां च पक्षाणां देशाचारतो व्यवस्था॥ शुद्धिविवेके तु षष्टियोजनानंतरत्वं तदंतेऽपि भाषाभेदो गिरिमहान
द्यौ यत्र भाषान्यानि वेति लक्षणद्वयमेव निष्कृष्टेणोक्तं॥ मातापित्रोर्मरणेऽपवादमाह॥ अथ पितृमरणे देशकालाविशेषात्स्व
स्वं॥ माता च पिता च पितरौ तयोर्द्वयोर्मरणे दशाहात्परं यदा कदाचिदस्मिन्नस्मिन्नपि देशे जाते देशकालाविशेषा
स्वदेशरूपदेशविशेषं त्रिमासं पूर्णं॥ इत्यादिरूपं च कालविशेषमनालोच्य स्वं स्वं दशाहं द्वादशाहं वा शौचं पुत्रैः क
र्तव्यं॥ तथा च पैठीनसिः॥ पितरौ चेन्मृतौ स्यातां दूरस्थोऽपि हि पुत्रकः॥ श्रुत्वा तद्दिनमारभ्य दशाहं सूतकी भवे
ति॥ अपि शेषकालांतरेऽपि॥ अपवादांतरमाह मातुः सपत्न्या[...]स्त्रिदिनं॥ देशकालविशेषादि समनुवर्तते॥ मातुः स
सपत्न्यामरणे आशौचकालोत्तरं यदा कदाचिदस्मिन्नस्मिन्नपि देशे जाते त्रिदिनमाशौचं पुत्रैः कार्यं॥ तथा च स्मृ
त्यंतरे पितृपत्न्यामपेतायां मातृवर्ज्यं द्विजोत्तमः॥ संवत्सरे व्यतीतेऽपि त्रिरात्रमशुचिर्भवेदिति॥ इदमतिक्रांताशौ
चसमानं॥ इदमाशौचकालातिक्रांतौ यदाशौचमुक्तं तत्सर्ववर्णानां समानं न तु वर्णभेदाद्भिन्नं॥ तथा च व्याघ्रपादः
तुल्यं वयस्सु सर्वेषामतिक्रांते तथैव चेति॥ ६॥ ॥ ७॥ पित्रोर्गेहे समूढायाः प्रसवमरणयोरेकरात्रं त्रिरात्रं स्याता
पित्रादिकानां॥ मातापितृगृहे समूढायाः परिणीतायाः दुहितुः प्रसवे मरणे च यथाक्रमं पित्रोरेकरात्रं त्रिरात्रं
स्यातां प्रसवे एकरात्रं मरणे त्रिरात्रं॥ आदिपदग्राह्याणां भ्रातृणां मातापितृगृहवाससमानतंत्रे तत्पक्षावस्व
ज्ञेयं गृहस्थायाः प्रसवमरणे च पूर्ववदेकरात्रं त्रिरात्रं॥ तथा च विष्णुः॥ संस्कृतासु स्त्रीषु नाशौचं पितृपक्षे त
त्प्रसवमरणे चेत्पितृगृहे स्यातां तदैकरात्रं त्रिरात्रं चेति॥ पितृपक्षस्यापि विशेषः॥ तदुपक्रमात्॥ पक्षपदेन भ्रातर



Indira Gandhi National
Centre for the Arts

एवं गर्भस्थं तेवाकांतरेण गर्भिणीमरणे त्रिरात्रविधानात्॥ पतिगृहे तु समृद्धा प्रसवमरणयोः प्रसवे तावत्सर्वेषां पित्रा
दीनां माशौचाभावः प्रायकाभावात्॥ मरणे तु पित्रोस्त्रिरात्रं भवत्येव बैजिकादभिसंबंधादनुरूपादेरपस्मृः॥ प्रत्ताप्रत्ता
सु योषित्सु संस्कृतास्वसंस्कृतासु च॥ मातापित्रोस्त्रिरात्रं स्यादितरेषां यथाविधीत्यादि सामान्येन स्मरणादुक्तवत्राशौच
कालांतरश्रवणाद्विष्णुवाक्यगतपितृगृहग्रहणस्य च प्रसवमात्रविषयत्वेन सार्थक्यात्॥ प्रत्तानां तु वक्ष्यमाणप
क्षिणी॥ त्रिरात्रं स्वगृहे यस्य मृतः कृच्छ्रं दसपिंडः कृपं चेन॥ तस्याः पुत्राशौचं विद्येत यत्त्रिरात्रे नात्र संशय इति अंगिरोवच
नेन स्वगृहमरणे व्यवस्थापितत्वात्॥ इदं च वचनमुक्तं वक्ष्यमाणविषयत्वम्॥ सेतरोक्तपक्षिण्यादिकं तु रविकल्पित
त्रिरात्रव्यवस्थापकमेव लाघवान्न तु स्वगृहे यत्किंचित्सपिंडमरणे एवं त्रिराशौचविधायकं गौरवाद्वाक्या
न्तरविहितैकरात्रविरोधाच्च॥ असपिंडपरेने वचनात्याशौचानर्हमुक्तम्॥ एवं च सति यत्र त्रिरात्राद्यविनियमेनोक्तं त
न्न स्वगृहे भृगोर्वा मरणे तदेव॥ यत्र तु त्रिरात्रं पक्षिण्या एकरात्रेण वा विकल्पितमुक्तं तत्रांगिरोवचनात्त्रिरात्रस्य
स्वगृहमृतविषयत्वमितरस्य तदितरविषयत्वं॥ एकाहविकल्पितायां पक्षिण्यामप्येवमेव व्यवस्था॥ यत्र तु नियतमविक
ल्पितमुक्तं यथा मातुलादौ तत्र त्रिरात्रस्य पूर्वोक्तविषयत्वमित्यसंसर्गेण व्यवस्थाप्रकारः प्रसंगादत्रैवोक्तः॥ एवं विकल्पदीप
विषयत्वे वा एकरात्रस्य तु मातुलादौ अंगिरावचनस्य विधित्वमभ्युपगम्य सर्वत्रोक्तं वक्ष्यमाणविषयेष्वाशौचविभाग
व्यवस्थापकं वक्ष्यामः॥ यद्वाशौचं तु अंगिरावचनस्य॥ तत्रैव दुहितुः समृद्धायाः पितृगृहादन्यत्र मृतौ पित्रोः पक्षिणी
गृहमरणे त्रिरात्रमुक्तं तत्पाक्षिकं पक्षिरोधादुपेक्ष्यं॥



प्रतिनिमित्तं नैमित्तिकावृत्तिन्यायेन पृथग्दशाहादिकं प्राप्तं तत्र एवं च नाशौचावशिष्टदिनानामुभयसाधार
ण्यापि तदुत्तरमाशौचान्तरस्य दशाहादिष्वनुवृत्तिप्राप्तावपवादमाह॥ वृद्धाशौचस्य मध्ये तु परमपि समं स्वल्पकं
वा सजातिप्रेतजातं तरं वा यदि भवति तदा पूर्वशेषेण शुद्धिः॥ वृद्धस्य पूर्वप्रवृत्तस्याशौचस्य तत्परिच्छेदकस्य
दशाहादिरूपस्य कालस्य मध्ये द्वितीयादिदिने तु समं पूर्वप्रवृत्ताशौचसमकालव्यापकं स्वल्पकं तदपेक्षया न्यूनका
लव्यापकं वा सजातिजन्मनिमित्ते जन्मनिमित्तं मृतिनिमित्ते मृतिनिमित्तं परमपराशौचं स्वनिमित्तभूत
जननमरणोपनिपातेन यदि भवति प्रेते॥ मृतिनिमित्ताशौचमध्ये अत्यंतरं तत्र विजातीयं तादृशमेव जनन
शौचं वा यदि भवति तदा तस्याशौचान्तरस्य पूर्वाशौचकालशेषेण न वृद्धिरादिरूपेण शुद्धिर्भवति न तु
तन्निमित्तादारभ्य पूर्णदशाहादि भवतीत्यर्थः॥ एवं च सजातीयं स्वल्पसमानयुतेराशौचं निमित्तद्वयमेकस्मि
न्नेव दिने यदि भवति तदा विशेषाग्रहणात्साधारणकालपरिच्छेदं पूर्णमेवाशौचद्वयं भवति॥ तथाल्पकालव्या
पकाशौचमध्ये सजातीयमपि॥ अधिककालव्यापकाशौचनिमित्तं यदि भवति तदा तदुत्तरं पूर्णमेव तन्निमि
त्तमाशौचं भवति॥ तथा जननाशौचमध्ये दशपक्षस्वल्पकालाशौचनिमित्तं समकालाशौचनिमित्तं वाम
रणं यदि जायते तदा ते न्निमित्तमाशौचं न शावमध्यपतितस्यापि तस्य स्वधर्मप्रयोजकं॥ किं तु स्वरूप
कालादि स्वधर्मप्रयोजकं निमित्तानंतरं पूर्णं च भवति॥ तथा त्रिरात्रादिप्रेताशौचमध्ये दशाहादिव्यापकं॥

Indira Gandhi National
Centre for the Arts

त्रि.टी.
१५

जन्माशौचं यदि भवति तदा स्वकालं यावद् अस्पृश्यत्वादिस्वधर्मप्रयोजकत्वात् प्रबलेनापि शावाशौचेन न निवर्तते किं
तु पूर्णमेव भवतीति ध्वनिरेको दुर्बोधो भवति ॥ तथा चोशनाः ॥ सूतकाशौचस्य मध्ये तु दीर्घाशौचं भवेद्यदि ॥ न पू
र्वेण विशुद्धिः स्यात् स्वकालेनैव शुध्यतीति ॥ इदं च वचनं पूर्वप्रवृत्तमरणाशौचमात्रेण तदंतःपतितयोर्जन
नमरणाशौचमात्रयोः ॥ पूर्वप्रवृत्तजननाशौचमात्रेण च तदंतःपतितजन्माशौचमात्रस्य निवृत्तौ प्रसक्ता
भ्यां लघुनाधिकस्य तत्स्यात्तेषु धके उभयत्र तस्य सत्त्वविशेषात् ॥ तथा च त्रिरात्रादिशावांतःपातिनो दशा
हादिजननाशौचस्य न पूर्वेण निवृत्तिः किंतु स्वकालं यावदनुवर्तमानस्यैव तस्यास्पृश्यत्वादिस्वधर्मप्रयो
जकत्वमात्रेण गरीयसा शावाशौचेन स्वधर्मप्रयोजकत्वनिवृत्तिमात्रं ॥ सूतके मृतकं चेत्स्यान्मृतके त
्वथ सूतकं ॥ तत्राधिकृत्य मृतकं शौचं कुर्यान्न सूतकमित्यंगिरोवचनात् ॥ एतदप्यनापाग पद्ये तु से याज्ञ
वल्क्य ... इति कूर्मपुराणवचने एवापवादत्वमुक्तं राघवस्या
शुद्धिर्गरीयसा ॥ मरणोत्पत्तियोगे तु गरीयो मरणं भवेत् ॥ जननाशौचस्य स्वरूपनिवृत्तिरूपमपि बाध्यत्वमुक्तं रुद्रधरे
णोक्तं स लघुनापि मरणाशौचेन दीर्घस्यापि जननाशौचस्य स्वधर्मप्रयोजकत्वमात्ररूपगरीयस्त्वप्रतिपादकत्वोद्यु
पातत्त्वस्य सप्तापवादत्वेनास्योशनोवाक्याविरोधाय तस्य न पूर्वापवादत्वं किंतु तदविरोधेन समाधिककालं
क्तं ॥ वस्तुतस्तु सर्वप्रकारगरीयस्त्वप्रतिपादकत्वेपि ॥ षट्त्रिंशन्मतेपि ॥ शावाशौचे समुत्पन्ने सूतकं तु यदा भवेत् ॥
शावाशौचे गरीयस्त्वप्रतिपादकत्वमेवेति ॥ हेरंब १५

शावेन शुध्यते सूतिर्न सूतिः शावशोधिनीति ॥ एवं च अंतरा जन्ममरणे शेषाहोभिर्विशुध्यतीत्यादिसामान्य
वचनमप्यल्पविशेषविषयमेव भवति ॥ अंतरापतिताशौचकालाधिककालव्यापिना लघुनापि पूर्वस्य
वृत्ताशौचांतरस्यानिवर्तनीयत्वं तु उशनोवाक्यार्थापवादत्वेन दर्शितः ॥ परतः परतोऽशुद्धिरघवृद्धौ विधीयते ॥
स्याच्चेत्संचयनमाद्यस्तु ॥ पूर्वेणैवात्र शिष्यत इति ॥ अस्यार्थः ॥ न्यूनकालाशौचप्रवृत्तेः परतोऽघवृद्धौ शुद्धि
मतिदीर्घकालव्यापिन्यघे पतिते अशुद्धिस्तद्दीर्घकालमघपरतः परपूर्वज्ञातनिमित्तमारभ्य पूर्णवि
धीयते न तु पूर्वेण निवृत्तिः ॥ तत्र च प्रवृत्तौ लघ्वाशौचं यदि पंचत्वमादहांतरापतिताशौचकालाधीसरना
पानुवर्तते तदा पूर्वेणैव तदपगमे यावल्लघुनापि षडहादिरूपपूर्वाशौचकाले नैव साऽशुद्धिः शिष्यते निवर्त्य
त इति ॥ इदमत्रोदाहरणं चतुर्होतर्विदशस्य मरणे अवशेषेण शुद्धिर्वक्ष्यमाणत्वात् चदिनाधिकमाशौ
चे तन्मध्ये दशाहाशौचपाते पूर्वेण शुद्धिः ॥ अपरं च ॥ षण्मासगर्भपातनिमित्तषडहाशौचमध्ये त्र्यहस्य दशा
हाशौचस्य पूर्वेण निवृत्तिरिति ॥ अत्र शुद्धिविवेके आद्यभागद्वये यावत्तत्केशुलु सूतके ॥ द्वितीये पाति
ते न्यायात्सूतकाशुद्धिर्विष्यते ॥ अतएव ॥ द्वितीयानुसूतकालाच्छुद्धिः स्मृता ॥ एवमेव विचार्य स्यान्मृत
कमृतकांतरे ॥ इति ब्रह्मपुराणवचनेन पूर्वेणाप्यनुशिष्यत इति पाठकल्पत्वापत्तुतमादहुः चतुर्थीविभ
आद्यभागद्वयात्परतः अघवृद्धौ सजातीयसंपूर्णाशौचांतरपतिपातपरतः परेणाशौचेन
कोप्येवं प्रवृत्ताशौचभागद्वयात्परतः

Indira Gandhi National
Centre for the Arts

त्रिं.टी.
२६

तीतेन शुद्धिरिति चतुर्थपादं व्याख्याय रात्रिशेषे घटिकाशुद्धिर्यामशेषे तु विस्तरमहादिति च तदपवादत्वेन व्या
ख्याय दशाहादिसंपूर्णाशौचमध्ये द्वितीयसजातीयसंपाते शौचमाद्यभागदेयम् अपगतेति तदा पूर्वाशौचापगमेन शुद्धिः॥
यदि तु परि उपास्य दिनपर्यंतं तदा द्वितीयापगमेन॥ अत्र दिनेतदनंतरदिनं द्वयेन॥ तद्दिने रात्रेः शेषयामे तदनंतरं भिरा
त्रेणेति यथा स्मृताः प्रदर्शिताः॥ तत्रैव देवले वचनेस्य तदर्थत्वेन व्याख्यानं तावदयोगवृद्धिपदानीजस्यात्र वर्णे तस्यावस्थाप
नेश्च॥ अर्थोप्युक्तः॥ षष्ठसप्तमाष्टमनवदिने यदाशौचांतरापातेदशमादिनोत्तरं पंचषट्सप्तादिने तु तद
नुवृत्तिः दशमदिने तदाऽन्त्ययामपर्यंतं तदुपनिपाते द्वित्रिदिनवृत्तं तदनुवृत्तिरित्यस्यानुचितत्वात्॥ आनवमाद्दिवृ
नुवृत्तिः दशमदिने तदाऽन्त्ययामपर्यंतं तदुपनिपाते द्वित्रिदिनवृद्धि तदनुवृत्तिरित्यस्यानुचितत्वात्॥ आनवमाद्दिवृ
साद्दिति वौधायनवचनविरोधात्तु वा॥ कस्तर्हि ब्रह्मपुराणवाक्यस्यार्थः॥ तत्रैव विज्ञानेश्वरः रात्रिशेषे इत्येतस्मान्नार्थ
लेनेदं व्याचख्यौ॥ तथाहि सूतकसंबंधिचरमाहोरात्रस्यादिवसरूपमाद्यभागद्वयं यावद्द्वितीयसूतकपतितमाद्यारं
सूतकाच्छुद्धिः॥ अतः आद्यभागद्वयादूर्ध्वं रात्रौ सूतकांतरापाते द्वितीयापातेनैव भिन्नात्सूतकात्शुद्धिः॥ स्वसूतकं
सूतकाच्छुद्धिः॥ अतः आद्यभागद्वयादूर्ध्वं रात्रौ सूतकांतरापाते द्वितीयापाते तदुक्तं अथ यदि दशरात्राः संनिपतेयुराद्यं दशरात्र
नाशौचशेषमस्यादिनाशौचांतं पादिभिर्दर्शितमिति॥ तदप्युक्तं अथ यदि दशरात्राः संनिपतेयुराद्यं दशरात्र
मूशौचमानवमादिवसात्॥ पुनः पोतदशाहो ब्राह्मणस्य वणिक्समागच्छति॥ दशमेह्नि पतत्यस्मात् द्वे पात्र्वेत्रिशुध्य
तामपि तेतु त्रिरात्रेण दशरात्रेष्वयं विधिरिति बौधायनदेवलवचनाभ्यां नवमदशमरात्र्योः पाते संपातदिनो
पलक्षणत्वेनोपात्तदिनपर्यंतमेव पूर्वपाररात्रिचतुर्थयामपर्यंतं चांतिमाहोरात्र द्विरात्राधिकेन तेन शुद्धिः प्रति

पादितत्वात्॥ रात्रिशेषइत्यादिकं त्वेतदविरोधेनैवानुपदं व्याख्यास्यामः॥ चरमाहोरात्रविषयत्वं ... वा स्यन्नवाक्या
स्वीकरणाद्दृलभ्यते॥ तस्माद्ब्रह्मपुराणमिति शूलपाणिरवतमिदर्शितात्स्मृतान्वदरीनाथ्निर्मूलमेव॥ यद्वा परतः पूरते
इत्यादिवाक्यसमानार्थत्वेनैवं व्याख्येयं अंतरापतितेसूतके स्वचतुर्थीविभक्त्या यभागद्वयमध्ये याव ... तत्सूतके तुले
मे व्याख्याने पूर्वस्य स्पष्टत्वात्। पतितस्य प्रथमनिर्दिष्ट
दृश्यिककालव्यापिनि लघुनि पूर्वप्रवृत्तसूतकेन तदृश्यिके द्वितीयपतितेऽपि तत्सूतकस्य तु सूतकेष्वस्य प्रथमनिर्दिष्ट
इतः पातितसूतकादेव शुद्धिर्नेत्युपर्वी तु॥ अतः अर्धार्दूर्ध्वं तदृश्यिककालव्यापिनि लघुन्यपि सूतके तदृश्यिके द्वितीयपति
तद्द्वितीया लत्रे वच रमानिर्दिष्टात्वेसूतकादेव शुद्धिः॥ एवं शावाशौचेपीति॥ पूर्वोक्तविशेषणाविशिष्टपूर्वप्रवृत्ताशौ
तद्द्वितीयापातवचनात् सूतकादेव शुद्धिः॥ एवं शावाशौचेपीति॥ पूर्वोक्तविशेषणविशिष्टचेत्वांतरनिमित्तोपनिपाते पूर्वशेषमात्रेण शुद्धिराशावाहे॥ द्वाभ्यां तद्दा॥
च्चांतिमाहोरात्रे पूर्वोक्तविशेषणविशिष्टचेत्वांतरनिमित्तोपनिपाते पूर्वशेषमात्रेण शुद्धिराशावाहे॥ द्वाभ्यां तद्दा॥
त्रिशेषात्त्रिभिरपरादिने यामिनीयामशेषे॥ रात्रिशब्दोहोरात्रपरः॥ शेषित्रपःशेषोरात्रिशेषः॥ तथा चतस्य पूर्वेद्यु
वृत्तपूर्वोक्ताशौचस्य रात्रिशेषे अंतिमाहोरात्रे अंतिमाष्टमयामन्यूने पूर्वोक्ते द्वितीयाशौचोपनिपाते तद्दिनादपराभ्यां
द्वाभ्यां दिनाभ्यां शुद्धिः॥ तदंतिमाहोरात्रयामिन्याः यामरूपे शेषे अंतिमत्र्यहरूते तस्मिन् त्रिभिस्तद्दिनापरदिनैः शु
द्धिरित्यर्थः॥ तथा च पुनः पातइत्यादिकं पूर्वलिखितदेवलवचनेन॥ तत्र वपयपि सर्पोदयात्प्राग्
द्विनेतुपूर्वशेषमात्रेणोत्सर्थः॥ तथा च पुनः पातइत्यादिकं पूर्वलिखितं देवलवचनेन॥ तत्रापि यद्यपि सर्पोदयात्प्राची
नःप्राचीप्रकाशकालः प्रभातशब्देनोच्यते तथापि त्रीसयामपरएवासो॥ रात्रिशेषे घटिकाशुद्धिर्यामशेषे तु विस्तर
हादिति शातातपीयपामग्रहणात्॥ अत्रापि रात्रिशब्दोहोरात्रपरः॥ रात्रिमात्रावशिष्टे इत्यादिमितिताक्षरादिदृ
चपि तथा॥ एवं बौधायनवचनाविरोधेन रात्रिशेषइत्यस्य व्याख्यानसंभवे यद्दाच स्यतेरस्यानादरत्वाभिधानं त

हेरंब
२६

रजःशक्तिर्निबंधनं॥ केचित्तु देवलबौधायनवचनानालोचनेन चरमाहोरात्रसंबंधिस्त्रयोऽस्तमयोत्तरं त्रिषु यामेषु आशौ-
चांतरोपनिपाते द्वाभ्यां तदुत्तरयामे सूर्योदयपर्यंतं त्रिभिरिति विषयाश्रुतमेव सर्वे व्याचक्षते॥ इयं च चरमाहोरा-
त्रोक्ताव्यवस्था सजातीयपातः पातिनि सजातीये वा पातः पातिनि विजातीये च संपूर्णाशौच एव भवति न तु संपूर्णा-
तः॥ पातिनि असंपूर्णे तः पातिनि वा संपूर्णे तत्र केवलयोरेव द्व्यहत्र्यहयोः शेषेकालसंभवेन पूर्वाशौचशेषसा-
पेक्षत्वोपवृत्ते प्रतिपादनायोगात्॥ पूर्वोक्ता तु व्यवस्था तत्रापि भवेति तस्यास्तद्विषयत्वे बीजाभावात्॥ यत्तु
रूढुधरेण पूर्वोक्तदेवलबौधायनवचनेन बलादिदं यं सर्वापि व्यवस्था संपूर्णाशौचविषयैव समकालव्यापकोऽसंपू-
र्णाशौचसंनिपाते तु उत्तरेणैव शुद्धिरित्युक्तं॥ तदयुक्तं॥ अनन्याशौचमध्यमपरं जनंस्यात्तत्र पूर्वाशौचमपग-
मे शुद्धिः मरणाशौचमध्यमपरो प्येवं॥ अंतरा जन्ममरणे शावाहोभ्यि विशुध्यतीत्यादि विष्णुयाज्ञवल्क्यादिवाक्येषु वि- हरंब १७
शेषानुपादानात्॥ बौधायनादिवाक्ये पिक्षत्रिपादिसंपूर्णाशौचसंग्रहार्थमुपलक्षणत्वस्यालस्यागौकापत्ते लाघ-
वादाशौचमात्रोपलक्षणत्वस्यैव युक्तत्वात्॥ तत्र वाक्यान्तरबलाल्लघुतः पाति दीर्घस्य संतः पातिशावमात्रमेव परि-
द्विपतान्न तु संपूर्णाशौचमपि प्रमाणाभावात्॥ अत्र वर्द्धितद्व्यहत्र्यहाशौचे तदधिकाशौचांतरोपनिपाते तस्य लघुत्वा-
दृष्टिकाशौचापगमेनैव शुद्धिरिति प्रतिभाति॥ एवं च जन्मशावान्तः पातिनः तत्समकालस्यापि तस्याशिष्टशावस्यभ
पूर्वेण निवृत्तिरित्याह॥ नैवाशौचेन पिंडः॥ माता चेत्पिता चेत्पितरौ तत्स्त्वं च्याशौचमंतरापतितं पूर्वेण चेतरस्य

पिंड मरणाशौचेन न गच्छति किं तु निमित्तोदारस्य पूर्णे भवतीत्यर्थः॥ एवं च सति पितृमरणनिमित्ताशौचस्यांतरसपिंडाशौ-
चेनैव मात्राशौचेनापि यथा निवृत्तिर्नास्ति तथा मात्राशौचस्यापीतरसपिंडाशौचेनैव पित्राशौचेनापि निवृत्तिर्नास्ती-
ति शास्त्रीविशेषमाह॥ पितुरूपशमने पक्षिणीमात्रमस्तो॥ पितुरूपशमने पूर्वं जाते तन्निमित्ताशौचमशुद्धे सत्यां पश्चान्मा-
तमस्तो न पित्राशौचशेषमात्रेण शुद्धिः किं तु पक्षिणी अधिका भवति॥ तत्र दशाहमध्ये न पर्यंत दशमरात्रिपर्यंतं वा मा-
त्राशौचोपनिपाते पक्षिणीमात्रं॥ तत्र तु दशाहमध्ये समुच्चितं॥ तथा च शंखः॥ मातर्यग्रे प्रमीतायामशुद्धौ म्रिय-
ते पिता॥ पितुः शेषेण शुद्धिः स्यान्मातुः कुर्यात्तु पक्षिणीमिति॥ अस्यार्थः॥ मातर्यग्रे प्रमीतायां तन्निमित्तायामप
शुद्धौ सत्यां यदि पिता म्रियेत तदा पितुस्तन्निमित्ताशौचस्य शेषेण मात्राशौचपरिच्छेदकदिनोत्तरम-
च्छित्तद्दिने प्यनुवर्तमानेन शुद्धिर्न तु मात्राशौचशेषेण॥ पित्राशौचमध्ये मातुस्तु मरणे पितुः शेषेण शु-
द्धिः स्यादेव पक्षिणीं तदधिकां कुर्यादिति॥ एवं च मात्राशौचेनापि पित्राशौचस्य न निवृत्तिः किं तु तोन्येन॥ तथा
पित्राशौचेनापि केवलेन मात्राशौचस्य न निवृत्तिः किंतु तान्येन केवलेन्यनासहितेन चेति कैमुतिकन्यायेनास्मा-
द्वचनात्स्याप्यर्थस्यासिद्धमभिप्रसनेवाशौचेनपि अभिप्रेतं॥ इदं च संनिपाते पूर्वेणाशुद्ध्यभिधानं स्मृतिका-
रैरितरसपिंडानां॥ तयोस्तन्निमित्तादारस्य पूर्णमेवानधिकारलेक्षणामस्पृश्यत्वलक्षणं वाशौचमभिलिषद्
नृणां सांविशेषतः॥ पूर्वाशौचेनपाशुद्धिः सूतके मृतके च सा॥ सूतिकामभ्ननं दृहितामेतस्य च सुतानपीति॥ तथा

Indira Gandhi National
Centre for the Arts

त्रिं॰टी॰
१०८

आशौचसंनिपाते पूर्वनिमित्तकमुत्तरेण उत्तरनिमित्तकं वा पूर्वेण जातकर्मपिंडदानादिकं न प्रतिबध्यते॥ यथाह स्म
आपस्तंबः॥ आशौचे तु समुत्पन्ने पुत्रजन्म यदा भवेत्॥ कर्तुस्तात्कालिकी शुद्धिः पूर्वाशौचेन शुध्यतीति॥ आशौचे सू
तिनिमित्ते मृतिनिमित्ते वा॥ ... पायि॥ अंतर्दशाहे जननात्पश्चात्स्यान्मरणं यदि॥ प्रेतमुद्दिश्य कर्तव्यं पिंडदानं
स्वबंधुभिः॥ प्रारब्धे प्रेतपिंडे तु मध्ये चेज्जननं भवेत्॥ तथैवाशौचपिंडांस्तु शेषान् दद्याद्यथाविधीति॥ जनने
गृहणे मरणस्याप्युपलक्षणं तुल्यन्यायत्वात्॥ १०॥ ॥छ॥ सर्वत्राशौचमेतद्यदि विदितमिदं स्याच्च मात्रेण शुद्धिः॥
तद्दशस्थे नेदशाभ्यंतरस्थे न वा सर्वदुःखे संपूर्णमसंपूर्णं वाशौचं तन्निमित्तमिति यावत्॥ यदि अंतः प्रवर्तितदिना
निद्धितेपि दिनेषु विदितं ज्ञातं तदा अस्याशौचस्य तच्छेषदिनैरेव शुद्धिः स्यात्। निमित्तोत्तरदशाहादिदिनसंख्यातस्य
यः शेषस्तन्मात्रेण शुद्धिः॥ न तु स्नानादारभ्य दशरात्रत्रिरात्रादिनेत्यर्थः॥ तथा च याज्ञवल्क्यः॥ प्रोषिते कालशे
षः स्यादिति॥ विदितग्रहणं च ज्ञातयोर्जननमरणयोराशौचनिमित्तत्वं न तु जातमात्रयोरिति दर्शयति॥ त
त्रैतदारभ्य सामर्थ्याद्देवस्य स्यादिति॥ अन्यथा आशौचादिनगणनायाः उत्पत्ति प्रभृति कल्पितत्वे निमित्तज्ञाने
शेषदिनाभावादशौचमर्थादेव भवतीति दूरमनारंभणीयं स्यात्॥ आशौचप्रवृत्तिदिनमारभ्य दशाहाद्दशाहात्ताः सर्वमर
णदिवसतोऽप्यंकुर्याद्दशौच॥ आहिताः ... ग्नो आहिताग्निमृति ... दशाहाद्दशाहं दिवसमारभ्य दशाहाद्यशौचं तन्नि
मित्तकं कर्म च॥ संख्यावदनलोपादि कुर्यात्॥ अन्यत्र तद्दिनसमारभ्य॥ आहिताग्निमतिः ... दो चैव न च मरण

दिवसतत्स्वरूपं तस्य सर्ववाशौचं कुर्यात॥ तथा च॥ अनग्निमत्युत्क्रांते राशौचादिहि जातिषु॥ दाहादग्निमतो विप्राद्द
